॥ श्रीः ॥

शतकत्रयम् ॥

श्रीभर्तृहरिविरचितम् ।

श्रीरङ्गस्थ
श्रीवाणीविलासमुद्रायन्त्रालये
समुद्रितम् ।
१९११

॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

नीतिशतकम्

॥ श्रीः ॥

॥ नीतिशतकम् ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नम शान्ताय तेजसे ॥

मूर्खपद्धति ॥

बोद्धारो मत्सरग्रस्ता प्रभव स्मयदूषिता ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम ॥ १ ॥

अज्ञ सुखमाराध्य सुखतरमाराध्यते विशेषज्ञ ।
ज्ञानलवदुर्विदग्ध ब्रह्मापि नर न रञ्जयति ॥ २ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥

लभेत सिकतासु तैलमपि यत्नत पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दित ।
कदाचिदपि पर्यटञ्छशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

व्याल बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन संनह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान्य प्रतिनेतुमिच्छति बलात्सूक्तै सुधास्यन्दिभि ॥

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञताया ।
विशेषत सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ६ ॥

यदा किंचिज्ज्ञोऽहं गज इव मदान्ध समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन ।
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत ॥ ७ ॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन्नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ८ ॥

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधो गङ्गा सेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ९ ॥

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥

विद्वत्पद्धतिः ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।

तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः
 कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः ॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-
 प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
 येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
 स्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि ।
अभिनवमदरेखाश्यामगण्डस्थलाना
 न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १३ ॥

अम्भोजिनीवनविहारविलासमेव
 हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
 वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ १४ ॥

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
 न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥१५॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥

क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैव पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।

चेत प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ १९ ॥

जयन्ति ते सुकृतिनो रससिद्धा कवीश्वरा ।
नास्ति तेषा यश काये जरामरणज भयम् ॥ २० ॥

मानशौर्यपद्धतिः ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृह
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ २१ ॥

स्वल्पस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गो
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥

भूमौ निपत्य वदनोदरदर्शनं च ।

श्वा पिण्डदस्य कुरुते गजपुगवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ २३ ॥

परिवर्तिनि ससारे मृत को वा न जायते ।
स जातो येन जातेन याति वश समुन्नतिम् ॥ २४ ॥

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विन ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ २५ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतय सभाविता पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रात पर्वणि पश्य दानवपति शीर्षावशेषाकृति ॥

वहति भुवनश्रेणिं शेष फणाफलकस्थिता
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीन पयोधिरनादरा-
दहह महता नि सीमानश्चरित्रविभूतय ॥ २७ ॥

वर प्राणोच्छेद समदमघवन्मुक्तकुलिश
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभि ।
तुषाराद्रे सूनोरहह पितरि क्लेशविवशे
न चासौ सपाप पयसि पयसा पत्युरुचित ॥ २८ ॥

यदचेतनोऽपि पादै स्पृष्ट प्रज्वलति सवितुरिनकान्त ।
तत्तेजस्वी पुरुष परकृतनिकृति कथ सहते ॥ २९ ॥

सिंह शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरिय सत्त्ववता न खलु वयस्तेजसा हेतु ॥ ३० ॥

अर्थपद्धतिः ॥

जातिर्यातु रसातल गुणगणस्तत्राप्यधो गच्छता
शील शैलतटात्पतत्वभिजन संदह्यता वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु न केवलं
येनैकेन विना गुणास्तृणलवप्राया समस्ता इमे ॥ ३१ ॥

यस्यास्ति वित्त स नर कुलीन
स पण्डित स श्रुतवान्गुणज्ञ ।

स एव वक्ता स च दर्शनीय·
सर्वे गुणा काञ्चनमाश्रयन्ति ॥ ३२ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यति. सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषि स्नेह प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ३४ ॥

मणि शाणोल्लीढ समरविजयी हेतिदलितो
मदक्षीणो नाग शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्र सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नरा ॥ ३५ ॥

परिक्षीण. कश्चित्स्पृहयति यवाना प्रसृतये
स पश्चात्सपूर्ण: कलयति धरित्रीं तृणसमाम् ।
अवश्चानेकान्ता गुरुलघुतयार्थेषु धनिना-
मवस्था वस्तूनि प्रथयति च सकोचयति च ॥ ३६ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेना
　तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपुष्यमाणे
　नानाफलं फलति कल्पलतेव भूमिः ॥ ३७ ॥

सत्यानृता च परुषा प्रियवादिनी च
　हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
　वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ३८ ॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां
　दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
　कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ३९ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
　तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
　कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥

दुर्जनपद्धतिः ॥

अकरुणत्वमकारणविग्रहः
परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ ४१ ॥

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ४२ ॥

जाड्यं ह्रीमति गण्यते व्रतशुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तव्यशक्तिस्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ४५ ॥

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ४६ ॥

मौनान्मूकः प्रवचनपटुर्वाचको जल्पको वा
दृष्टः पार्श्वे भवति च वसन्दूरतोऽप्यप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ४७ ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ४८ ॥

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।

दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ ४९ ॥

मृगमीनसज्जनाना
तृणजलसतोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना
निष्कारणमेव वैरिणो जगति ॥ ५० ॥

सुजनपद्धतिः ॥

वाञ्छा सज्जनसगतौ परगुणे प्रीतिर्गुरौ नम्रता
विद्याया व्यसन स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्ति शूलिनि शक्तिरात्मदमने ससर्गमुक्ति खलै-
रेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नम ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रम. ।
यशसि चाभिरतिर्व्यसन श्रुतौ
प्रकृतिसिद्धमिद हि महात्मनाम् ॥ ५२ ॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ५३ ॥

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा-
सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥

संपत्सु महतां चित्तं भवेदुत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ५५ ॥

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ५६ ॥

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।

अनुत्सेको लक्ष्म्या निरभिभवसारा परकथा
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ५७ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते ।
अन्तः सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः ॥ ५८ ॥

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ५९ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः
स्वार्थान्संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्जनान्दुःखयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥

परोपकारपद्धतिः ॥

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ६१ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणाकुलानां
परोपकारेण न चन्दनेन ॥ ६२ ॥

पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः ॥ ६३ ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।

तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ६५ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरा तेऽखिला.
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोऽपि बडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ६७ ॥

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ।

सजातव्यर्थपक्षा परहितकरणे नोपरिष्टान्न चाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टा ॥ ६८ ॥

तृष्णां छिन्धि भज क्षमा जहि मदं पापे रतिं मा कृथा
सत्य ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रय
कीर्तिं पालय दु खिते कुरु दयामेतत्सता चेष्टितम् ॥

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभि प्रीणयन्त. ।
परगुणपरमाणून्पर्वतीकृत्य नित्य
निजहृदि विकसन्त सन्ति सन्त कियन्त ॥ ७० ॥

धैर्यपद्धतिः ॥

रत्नैर्महाब्धेस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधा विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीरा ॥ ७१ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ ७२ ॥

कचित्पृथ्वीशय्य कचिदपि च पर्यङ्कशयन,
कचिच्छाकाहार कचिदपि च शाल्योदनरुचि ।
कचित्कन्थाधारी कचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मी समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथ प्रविचलन्ति पद न धीरा ॥ ७४ ॥

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुताप ।
तर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स धीर ॥ ७५ ॥

कदर्थितस्यापि हि धैर्यवृत्ते-
र्न शक्यते धैर्यगुण प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव ॥ ७६ ॥

वर भृङ्गोत्सङ्गाद्गुरुशिखरिण' क्वापि विषमे
पतित्वाय काय कठिनदृषदन्ते विगलित ।
वर न्यस्तो हस्त फणिपतिमुखे तीक्ष्णदशने
वर वह्नौ पातस्तदपि न कृत शीलविलय ॥ ७७ ॥

वह्निस्तस्य जलायते जलनिधि कुल्यायते तत्क्षणा-
न्मेरु स्वल्पशिलायते मृगपतिः सद्य कुरङ्गायते ।
व्यालो माल्यगुणायते विषरस पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतर शील समुन्मीलति ॥ ७८ ॥

छिन्नोऽपि रोहति तरु क्षीणोऽप्युपचीयते पुनश्चन्द्र ।
इति विमृशन्त सन्त सतप्यन्ते न लोकेषु ॥ ७९ ॥

ऐश्वर्यस्य विभूषण सुजनता शौर्यस्य वाक्सयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्यय ।

अक्रोधस्तपस क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शील पर भूषणम् ॥ ८० ॥

दैवपद्धतिः ॥

नेता यस्य बृहस्पति प्रहरण वज्र सुरा सैनिका
स्वर्गो दुर्गमनुग्रह खलु हरेरैरावतो वारण ।
इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्न परै सगरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवर स्वयं निपतितो नक्त मुखे भोगिन ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यात पथा
स्वस्थास्तिष्ठत दैवमेव हि पर वृद्धौ क्षये कारणम् ॥

यथा कन्दुकपातेनोत्पतत्यार्य पतन्नपि ।
तथा त्वनार्य. पतति मृत्पिण्डपतन यथा ॥ ८३ ॥

खर्वाटो दिवसेश्वरस्य किरणै संतापिते मस्तके
गच्छन्देशमनातप द्रुतगतिस्तालस्य मूल गत ।

तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥

गजभुजङ्गविहङ्गमबन्धनं
शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ ८५ ॥

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलंकरणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चे-
दहह कष्टमपण्डितता विधेः ॥ ८६ ॥

अयममृतनिधानं नायकोऽप्योषधीनां
शतभिषगनुयातः शंभुमूर्ध्नोऽवतंसः ।
विरहयति न चैनं राजयक्ष्मा शशाङ्कं
हतविधिपरिपाकः केन वा लङ्घनीयः ॥ ८७ ॥

प्रियसख विपद्दण्डाघातप्रपातपरंपरा-
परिचयबले चिन्ताचक्रे निधाय विधिः खलः ।

मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालव-
भ्रमयति मनो नो जानीम किमत्र विधास्यति ॥

विरम विरमायासादस्माद्दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि जडविधे कल्पापायेऽप्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥ ८९ ॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनमेन्मनागपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥

कर्मपद्धतिः ॥

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किममरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ९१ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम् ॥

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९५ ॥

स्थाल्यां वैदूर्यमय्यां पचति तिलखलं चान्दनैरिन्धनौघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कतूलस्य हेतोः ।
छित्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न भजति मनुजो यस्तपो मन्दभाग्यः ॥

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९७ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे
वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥ ९९ ॥

भीमं वनं भवति यस्य पुर प्रधानं
सर्वो जन स्वजनतामुपयाति यस्य ।
कृत्स्ना च भूर्भवति सनिधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृत विपुल नरस्य ॥ १०० ॥

इति नीतिशतकं सपूर्णम् ॥

शृङ्गारशतकम्

॥ श्रीः ॥

॥ शृङ्गारशतकम् ॥

स्त्रीप्रशंसा ॥

शंभुस्स्वयंभुहरयो हरिणेक्षणाना
येनाक्रियन्त सततं गृहकुम्भदासा ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते मकरध्वजाय ॥ १ ॥

स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षणै ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावै खलु बन्धनं स्त्रिय ॥ २ ॥

भ्रूचातुर्यात्कुञ्चिताक्षा कटाक्षा
स्निग्धा वाचो लज्जितान्ताश्च हासा ।

लीलामन्दं प्रस्थित च स्थित च
क्षीणामेतद्भूषण चायुध च ॥ ३ ॥

क्वचित्सभ्रूभङ्गै क्वचिदपि च लज्जापरिगतै
क्वचिद्भूरित्रस्तै क्वचिदपि च लीलाविलसितै ।
कुमारीणामेतैर्मदनसुभगैर्नेत्रवलितै
स्फुरन्नीलाब्जाना प्रकरपरिकीर्णा इव दिश ॥ ४ ॥

वक्त्र चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्ण स्वर्णमपाकरिष्णुरलिनीजिष्णु कचानां चय ।
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली
वाचा हारि च मार्दव युवतिषु स्वाभाविकं मण्डनम् ॥

स्मित किंचिन्मुग्धं सरलतरलो दृष्टिविभव
परिस्पन्दो वाचामभिनवविलासोक्तिसरस ।
गतानामारम्भ किसलयितलीलापरिकर
स्पृशन्त्यास्तारुण्य किमिव न हि रम्यं मृगदृशः ॥ ६ ॥

द्रष्टव्येषु किमुत्तम मृगदृश. प्रेमप्रसन्न मुख
घ्रातव्येष्वपि किं तदास्यपवन श्राव्येषु किं तद्वच ।

कि स्वाद्येषु तदोष्ठपल्लवरस स्पृश्येषु कि तद्वपु-
ध्येयं किं नवयौवन सहृदयै सर्वत्र तद्विभ्रम. ॥ ७ ॥

एताश्चलद्वलयसहतिमेखलोत्थ-
झकारनूपुरपराजितराजहंस्य ।
कुर्वन्ति कस्य न मनो विवश तरुण्यो
वित्रस्तमुग्धहरिणीसदृशै कटाक्षै ॥ ८ ॥

कुङ्कुमपङ्ककलङ्कितदेहा
गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा
क न वशीकुरुते भुवि रामा ॥ ९ ॥

नून हि ते कविवरा विपरीतवाचो
ये नित्यमाहुरबला इति कामिनीस्ता
याभिर्विलोलतरतारकदृष्टिपातै
शक्रादयोऽपि विजितास्त्वबला कथ ता ॥ १० ॥

नूनमाज्ञाकरस्तस्या सुभ्रुवो मकरध्वज ।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥ ११ ॥

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः ।
मुक्तानां सततादिवासरुचिरौ वक्षोजकुम्भाविमा-
वित्थं तन्वि वपुः प्रशान्तमपि ते रागं करोत्येव नः ॥

मुग्धे धानुष्कता केयमपूर्वा त्वयि दृश्यते ।
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥ १३ ॥

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ १४ ॥

उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावलिः केन वा ॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
कराभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ १६ ॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १७ ॥

तस्याः स्तनौ यदि घनौ जघनं च हारि
वक्त्रं च चारु तव चित्त किमाकुलत्वम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १८ ॥

इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरत-
प्रतापप्रारम्भाः स्मरविजयदानप्रतिभुवः ।
चिरं चेतश्चोरा अभिनवविकारैकगुरवो
विलासव्यापाराः किमपि विजयन्ते मृगदृशाम् ॥ १९ ॥

प्रणयमधुराः प्रेमोद्गारा रसाश्रयतां गताः
फणितिमधुरा मुग्धप्रायाः प्रकाशितसम्मदाः ।
प्रकृतिसुभगा विस्रम्भार्द्राः स्मरोदयदायिनो
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ २० ॥

सभोगवर्णनम् ॥

विश्रम्य विश्रम्य वनद्रुमाणा
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेण करोद्धृतेन
निवारयन्ती शशिनो मयूखान् ॥ २१ ॥

अदर्शने दर्शनमात्रकामा
दृष्ट्वा परिष्वङ्गसुखैकलोला ।
आलिङ्गिताया पुनरायताक्ष्या-
माशास्महे विग्रहयोरभेदम ॥ २२ ॥

मालती शिरसि जृम्भण मुखे
चन्दनं वपुषि कुङ्कुमाविलम् ।
वक्षसि प्रियतमा मदालसा
स्वर्ग एष परिशिष्ट आगम ॥ २३ ॥

प्राङ्मा मेति मनागनागतरसं जाताभिलाष तत
सव्रीड तदनु श्लथोद्यममथ प्रध्वस्तधैर्य पुन ।

प्रेमार्द्रं स्पृहणीयनिर्भररह क्रीडाप्रगल्भ ततो
नि सङ्काङ्गविकर्षणाधिकसुख रम्य कुलस्त्रीरतम् ॥२४॥

उरसि निपतिताना स्रस्तधम्मिल्लकानां
मुकुलितनयनाना किंचिदुन्मीलितानाम् ।
उपरि सुरतखेदस्विन्नगण्डस्थलाना-
मधरमधु वधूना भाग्यवन्त' पिबन्ति ॥ २५ ॥

आमीलितनयनाना
य सुरतरसोऽनु सविद भाति ।
मिथुनैर्मिथोऽवधारित-
मवितथमिदमेव कामनिर्वहणम् ॥ २६ ॥

इदमनुचितमक्रमश्च पुंसा
यदिह जरास्वपि मान्मथा विकारा ।
तदपि च न कृत नितम्बिनीना
स्तनपतनावधि जीवित रत वा ॥ २७ ॥

राजंस्तृष्णाम्बुराशेर्न हि जगति गत' कश्चिदेवावसान
को वार्थोऽर्थै प्रभूतै स्ववपुषि गलिते यौवने सानुरागे ।

गच्छाम सद्म तावद्विकसितकुमुदेन्दीवरालोकिनीना-
माक्रम्याक्रम्य रूपं झटिति न जरया लुप्यते प्रेयसीनाम् ॥

रागस्यागारमेकं नरकशतमहादुःखसम्प्राप्तिहेतु-
र्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं
लोकेऽस्मिन्न ह्यनर्थव्रजकुलभवनं यौवनादन्यदस्ति ॥२९॥

शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ।
तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयते प्राप्ते नवे यौवने ॥

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलङ्क-
व्यासङ्गव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभाजस्तरुण्यः ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ।

क कुर्वीत शिर. प्रणाममलिन म्लान मनस्वी जनो
यद्वित्रस्तकुरङ्गशावनयना न स्यु स्मराम्र स्त्रिय. ॥

ससार तव पर्यन्तपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि ते मदिरेक्षणा ॥ १३ ॥

दिश वनहरिणेभ्यो वशकाण्डच्छवीना
कवलमुपलकोटिच्छिन्नमूल कुशानाम् ।
शकयुवतिकपोलापाण्डुताम्बूलवल्ली-
दलमरुणनखाग्रै पाटित वा वधूभ्य ॥ १४ ॥

असारा सर्वे ते विरतिविरमा पापविषया
जुगुप्स्यन्ता यद्वा ननु सकलदोषास्पदमिति ।
तथाप्येतद्भूमौ न हि परहितात्पुण्यमधिकं
न चास्मिन्ससारे कुवलयदृशो रम्यमपरम् ॥ १५ ॥

मात्सर्यमुत्सार्य निवार्य कार्य-
मार्या समर्यादमिद वदन्तु ।
सेव्या नितम्बा किमु भूधराणा-
मुत स्मरस्मेरविलासिनीनाम् ॥ १६ ॥

संसारे स्वप्नसारे परिणतितरले द्वे गती पण्डितानां
तत्त्वज्ञानामृताम्भः प्लवललितधिया यातु कालः कथंचित् ।
नो चेन्मुग्धाङ्गनानां स्तनघनजघनाभोगसंभोगिनीनां
स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलीलोद्यमानाम् ॥

आवासः क्रियतां गाङ्गे पापहारिणि वारिणि ।
स्तनद्वये तरुण्या वा मनोहारिणि हारिणि ॥ ३८ ॥

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै-
र्द्वयमिह पुरुषाणां सर्वदा सेवनीयम् ।
अभिनवमदलीलालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ३९ ॥

सत्यं जना वच्मि न पक्षपाता-
ल्लोकेषु सप्तस्वपि तथ्यमेतत् ।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥ ४० ॥

कामिनीगर्हणम् ॥

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नम-
त्पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि
प्रत्यक्षाशुचिभस्त्रिका स्त्रियमहो मोहस्य दुश्चेष्टितम् ॥

स्मृता भवति तापाय दृष्टा चोन्मादकारिणी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ ४२ ॥

तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षु पथादतीता तु विषादप्यतिरिच्यते ॥ ४३ ॥

नामृत न विष किंचिदेकां मुक्त्वा नितम्बिनीम् ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ४४ ॥

आवर्त संशयानामविनयभुवन पट्टन साहसाना
दोषाणा संनिधान कपटशतमय क्षेत्रमप्रत्ययानाम् ।
स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्ड
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाश ॥

नो सत्येन मृगाङ्क एष वदनीभूतो न चेन्दीवर-
द्वन्द्वं लोचनतां गतं न कनकैरप्यङ्गयष्टिः कृता ।
किं त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥

लीलावतीनां सहजा विलासा-
स्त एव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्ध-
स्तत्र भ्रमत्येव वृथा षडङ्घ्रिः ॥ ४७ ॥

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृति परं
मुखाब्जं तन्वङ्ग्याः किल वसति यत्राधरमधु ।
इदं तत्किं पाकद्रुमफलमिदानीमतिरस-
व्यतीतेऽस्मिन्काले विषमिव भविष्यत्यसुखदम् ॥

उन्मीलत्त्रिवली तरङ्गनिलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्गतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ।
कान्ताकारधरा नदीयमभितः क्रूरात्र नापेक्ष्यते
संसारार्णवमज्जनं यदि तदा दूरेण संत्यज्यताम् ॥

जल्पन्ति सार्धमन्येन पश्यन्त्यन्य सविभ्रमा ।
हृद्गतं चिन्तयन्त्यन्य प्रिय को नाम योषिताम् ॥ ५० ॥

अपसर सखे दूरादस्मात्कटाक्षविषानला
त्प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृत ।
इतरफणिना दष्ट शक्यश्चिकित्सितुमौषधै-
श्चतुरवनिताभोगिग्रस्त त्यजन्ति हि मन्त्रिण ॥ ५१ ॥

विस्तारित मकरकेतनधीवरेण
स्त्रीसञ्ज्ञित बडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान्विकृष्य विपचत्यनुरागवह्नौ ॥ ५२ ॥

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा सचर मन पान्थ तत्रास्ते स्मरतस्कर ॥ ५३ ॥

व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिनाहिना परमह दष्टो न तच्चक्षुषा ।
दष्ट सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ॥

इह हि मधुरगीतं नृत्तमेतद्रसोऽय
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाण
स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥ ५५ ॥

न गम्यो मन्त्राणा न च भवति भैषज्यविषयो
न चापि प्रध्वसं व्रजति विविधै शान्तिकशतै ।
भ्रमावेशादङ्गे कमपि विदधद्भङ्गमसकृ-
त्स्मरापस्मारोऽय भ्रमयति दृश घूर्णयति च ॥ ५६ ॥

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहर निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत क ॥

वेश्यासौ मदनज्वाला रूपेन्धनविवर्धिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ५८ ॥

कश्चुम्बति कुलपुरुषो वेश्याधरपल्लव मनोज्ञमपि ।
चारभटचोरचेटकविटनटनिष्ठीवनशरावम् ॥ ५९ ॥

मधु तिष्ठति वाचि योषितां
हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेऽधरो
हृदय मुष्टिभिरेव ताड्यते ॥ ६० ॥

सुविरक्तदुर्विरक्तपद्धतिः ॥

धन्यास्त एव धवलायतलोचनाना
तारुण्यदर्पघनपीनपयोधराणाम् ।
क्षामोदरोपरि लसत्त्रिवलीलताना
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ६१ ॥

बाले लीलामुकुलितममी मन्थरा दृष्टिपाता
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते ।
संप्रत्यन्ये वयमुपरत बाल्यमास्था वनान्ते
क्षीणो मोहस्तृणमिव जगज्जालमालोकयाम ॥ ६२ ॥

इय बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचोरं चक्षु. क्षिपति किमभिप्रेतमनया ।

गतो मोहोऽस्माक स्मरशबरबाणव्यतिकर-
ज्वरज्वाला शान्ता तदपि न वराकी विरमति ॥ ६३ ॥

किं कन्दर्प शर कदर्थयसि रे कोदण्डटङ्कारित
रे रे कोकिल कोमलं कलरव किं वा वृथा जल्पसि ।
मुग्धे स्निग्धविदग्धचारुमधुरैर्लोलै कटाक्षैरलं
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृत वर्तते ॥ ६४ ॥

विरहेऽपि सगम खलु परस्पर सगत मनो येषाम् ।
हृदय विघट्टित चेत्सङ्गो विरह विशेषयति ॥ ६५ ॥

किं गतेन यदि सा न जीवति
प्राणिति प्रियतमा तथापि किम् ।
इत्युदीक्ष्य नवमेघमालिकां
न प्रयाति पथिक स्वमन्दिरम् ॥ ६६ ॥

विरमत बुधा योषित्सङ्गात्सुखात्क्षणभङ्गुरा-
त्कुरुत करुणामैत्रीप्रज्ञावधूजनसगमम् ।
न खलु नरके हाराक्रान्त घनस्तनमण्डल
शरणमथवा श्रोणीबिम्ब रणन्मणिमेखलम् ॥ ६७ ॥

यदा योगाभ्यासव्यसनकृशयोरात्ममनसो-
रविच्छिन्ना मैत्री स्फुरति कृतिनस्तस्य किमु तै ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभि
सनिश्वासामोदै सकुचकलशाश्लेषसुरतै ॥ ६८ ॥

यदासीदज्ञान स्मरतिमिरसचारजनित
तदा दृष्टं नारीमयमिदमशेष जगदिति ।
इदानीमस्माक पटुतरविवेकाञ्जनजुषा
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ६९ ॥

तावदेव कृतिनामपि स्फुर-
त्येष निर्मलविवेकदीपक ।
यावदेव न कुरङ्गचक्षुषा
ताड्यते चटुललोचनाञ्चलै ॥ ७० ॥

वचसि भवति सगत्यागमुद्दिश्य वार्ता
श्रुतिमुखरमुखाना केवल पण्डितानाम् ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलाप
कुवलयनयनाना को विहातु समर्थ ॥ ७१ ॥

स परप्रतारकोऽसौ निन्दति योऽलीकपण्डितो युवती ।
यस्मात्तपसोऽपि फलं स्वर्गः स्वर्गेऽपि चाप्सरसः ॥

मत्तेभकुम्भदलने भुवि सन्ति धीरा
केचित्प्रचण्डमृगराजवधेऽपि दक्षा ।
किं तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्या ॥ ७३ ॥

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां हृदि न धृतिमुषो दृष्टिबाणाः पतन्ति ॥

उन्मत्तप्रेमसंरम्भादारभन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ७५ ॥

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ ७६ ॥

शास्त्रज्ञोऽपि प्रगुणितनयोऽप्यात्तबोधोऽपि बाढं
संसारेऽस्मिन्भवति विरलो भाजनं सद्गतीनाम् ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिला भ्रूलता कुञ्चिकेव ॥ ७७ ॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः ॥ ७८ ॥

स्त्रीमुद्रां कुसुमायुधस्य जयिनीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यः प्लवेत्सागरे ॥

ऋतुवर्णनम् ॥

परिमलभृतो वाता शाखा नवाङ्कुरकोटयो
मधुरविधुरोत्कण्ठाभाज प्रिया पिकपक्षिणाम् ।
विरलविरलस्वेदोद्गारा वधूवदनेन्दव
प्रसरति मधौ धात्र्या जातो न कस्य गुणोदय ॥ ८१ ॥

मधुरय मधुरैरपि कोकिला-
कलरवैर्मलयस्य च वायुभि ।
विरहिण प्रहिणस्ति शरीरिणो
विपदि हन्त सुधापि विषायते ॥ ८२ ॥

आवास किलकिञ्चितस्य दयिता पार्श्वे विलासालया
कर्णे कोकिलकामिनीकलरव स्मेरो लतामण्डप. ।
गोष्ठी सत्कविभि समं कतिपयैर्मुग्धा. सिताशो करा
केषाञ्चित्सुखयन्ति चात्र हृदयं चैत्रे विचित्रा स्रज ॥

पान्थस्त्रीविरहानलाहुतिकलामातन्वती मञ्जरी
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ।

अल्पास्ते नवपाटलापरिमलप्राग्भारपाटच्चरा
वान्ति क्लान्तिवितानतानवकृत श्रीखण्डशैलानिला ॥

प्रथित. प्रणयवतीना तावत्पदमातनोतु हृदि मान ।
भवति न यावच्चन्दनतरुसुरभिर्मलयपवमान ॥ ८५ ॥

सहकारकुसुमकेसरनिकरभरामोदमूर्छितदिगन्ते ।
मधुरमधुविधुरमधुपे मधौ भवेत्कस्य नोत्कण्ठा ॥ ८६ ॥

अच्छाच्छचन्दनरसार्द्रतरा मृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च ।
मन्दो मरुत्सुमनस शुचि हर्म्यपृष्ठं
ग्रीष्मे मद च मदन च विवर्धयन्ति ॥ ८७ ॥

स्रजो हृद्यामोदा व्यजनपवनश्चन्द्रकिरणा
पराग. कासारो मलयजरज शीधु विशदम् ।
शुचि सौधोत्सङ्ग प्रतनु वसन पङ्कजदृशो
निदाघार्तावेतद्विलसति लभन्ते सुकृतिन ॥ ८८ ॥

सुधाशुभ्रं धाम स्फुरदमलरश्मि शशधर
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभि ।

स्रजो ह्यद्यामोदास्तदिदमखिलं रागिणि जने
करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे ॥ ८९ ॥

तरुणीवेषोद्दीपितकामा
विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा
प्रावृट् तनुते कस्य न हर्षम् ॥ ९० ॥

वियदुपचितमेघं भूमयः कन्दलिन्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेकारावरम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ९१ ॥

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः ।
क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयति ॥ ९२ ॥

इतो विद्युद्वल्लीविलसितमितः केतकितरोः
स्फुरन्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकीक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः सम्भृतरसाः ॥ ९३ ॥

असूचीसंचारे तमसि नभसि प्रौढजलद-
ध्वनिप्राज्ञंमन्ये पतति पृषताना च निचये ।
इद सौदामन्या' कनककमनीयं विलसित
मुद च ग्लानिं च प्रथयति पथि स्वैरसुदृशाम् ॥ ९४ ॥

आसारेण न हर्म्यत प्रियतमैर्यातु बहि शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिङ्ग्यते ।
जाता शीकरशीतलाश्च मरुतो रत्यन्तखेदच्छिदो
धन्याना बत दुर्दिन सुदिनता याति प्रियासगमे ॥९५॥

अर्धं सुप्त्वा निशाया सरभससुरतायाससन्नश्लथाङ्ग
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
सम्भोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो
ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मन्दपुण्य ॥

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोभृत:
काश्मीरद्रवसान्द्रदिग्धवपुषश्छिन्ना विचित्रै रतै ।
वृत्तोरुस्तनकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
ताम्बूलीदलपूगपूरितमुखा धन्या सुखं शेरते ॥ ९७ ॥

प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृति विकसत्कुन्दमाद्यद्द्विरेफे
काले प्रालेयवातप्रचलविलसितोदारमन्दारधाम्नि ।
येषा नो कण्ठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी
तेषामायामयामा यमसदनसमा यामिनी याति यूनाम् ॥

चुम्बन्तो गण्डभित्तीरलकवति मुखे सीत्कृतान्यादधाना
वक्ष सूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्त ।
ऊरूनाकम्पयन्त पृथुजघनतटात्स्रंसयन्तोंऽशुकानि
व्यक्त कान्ताजनाना विटचरितभृत शैशिरा वान्ति वाता ।

केशानाकुलयन्दृशो मुकुलयन्वासो बलादाक्षिप-
न्नातन्वन्पुलकोद्गम प्रकटयन्नावेगकम्प शनै ।
वार वारमुदारसीत्कृतकृतो दन्तच्छदान्पीडय-
न्प्राय शैशिर एष सप्रति मरुत्कान्तासु कान्तायते ॥

इति शृङ्गारशतक संपूर्णम् ॥

वैराग्यशतकम्

॥ श्रीः ॥

॥ वैराग्यशतकम् ॥

तृष्णादूषणम् ॥

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटय-
ञ्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकव-
त्तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि संतुष्यसि ॥

उत्खात निधिशङ्कया क्षितितल ध्माता गिरेर्धातवो
निस्तीर्ण सरिता पतिर्नृपतयो यत्नेन संतोषिता· ।
मन्त्राराधनतत्परेण मनसा नीता श्मशाने निशा.
प्राप्त काणवराटकोऽपि न मया तृष्णे सकामा भव ॥

खलालापा सोढा कथमपि तदाराधनपरै-
र्निगृह्यान्तर्बाष्प हसितमपि शून्येन मनसा ।
कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ ४ ॥

अमीषा प्राणाना तुलितबिसिनीपत्रपयसा
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनि संज्ञमनसा
कृतं मानव्रीडैर्निजगुणकथापातकमपि ॥ ५ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्त न सतोषत.
सोढा दु.सहशीतवाततपनक्लेशा न तप्त तप ।
ध्यात वित्तमहर्निशं नियमितप्राणैर्न शंभो पद
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तै· फलैर्वञ्चिताः ॥ ६

भोगा न भुक्ता वयमेव भुक्ता-
तपो न तप्तं वयमेव तप्ता ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णा ॥ ७ ॥

वलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो मूढः कायस्तदपि मरणापायचकितः ॥ ९ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

विषयपरित्यागविडम्बना ॥

न संसारोत्पन्न चरितमनुपश्यामि कुशल
  विपाक. पुण्यानां जनयति भयं मे विमृशत ।
महद्भि पुण्यौघैश्चिरपरिगृहीताश्च विषया
  महान्तो जायन्ते व्यसनमिव दातु विषयिणाम् ॥

अवश्य यातारश्चिरतरमुषित्वापि विषया
  वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्त स्वातन्त्र्यादतुलपरितापाय मनस
  स्वय त्यक्ता ह्येते शमसुखमनन्त विदधति ॥ १२ ॥

ब्रह्मज्ञानविवेकनिर्मलधिय कुर्वन्त्यहो दुष्कर
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो नि स्पृहा ।
सम्प्राप्तान्न पुरा न संप्रति न च प्राप्तौ दृढप्रत्यया-
न्वाञ्छामात्रपरिग्रहानपि पर त्यक्तु न शक्ता वयम् ॥

धन्याना गिरिकन्दरेषु वसता ज्योति पर ध्यायता-
  मानन्दाश्रुकणान्पिबन्ति शकुना नि शङ्कमङ्केशया' ।

अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १४ ॥

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं विशीर्णशतखण्डमयी च कन्था
हा हा तथापि विषया न परित्यजन्ति ॥ १५ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरशिरःस्पर्धि जघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ १६ ॥

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ।
दुर्वारस्मरबाणपन्नगविषव्याविद्धमुग्धो जनः
शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥

अजानन्माहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।

विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १८ ॥

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं
क्षुधार्तः शाल्यन्नं कवलयति मांसादिकलितम् ।
प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधू
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ॥

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥२०

याञ्चादैन्यदूषणम् ॥

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ।
याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
　　गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीवितानकुठारिका
　　जठरपिठरी दुष्पूरेयं करोति विडम्बनम् ॥ २२ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालिं कपालिं
　　ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
　　मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥

　　गङ्गातरङ्गकणशीकरशीतलानि
　　　　विद्याधराध्युषितचारुशिलातलानि ।
　　स्थानानि किं हिमवतः प्रलयं गतानि
　　　　यत्सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।
वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां
दुःखाप्तस्वल्पवित्तस्मयपवनवशानर्तितभ्रूलतानि ॥ २५ ॥

पुण्यैर्मूलफलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना
भूशय्या नवपल्लवैरकृपणैरुत्तिष्ठ यावो वनम् ।
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥२६॥

फल स्वेच्छालभ्य प्रतिवनमखेद क्षितिरुहा
पय स्थाने स्थाने शिशिरमधुर पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संताप तदपि धनिना द्वारि कृपणा ॥ २७ ॥

ये वर्तन्ते धनपतिपुर प्रार्थनादु खभाजो
ये चाल्पत्व दधति विषयाक्षेपपर्याप्तबुद्धे ।
तेषामन्त स्फुरितहसित वासराणि स्मरेय
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्ण ॥ २८ ॥

ये संतोषनिरन्तरप्रमुदितास्तेषा न भिन्ना मुदो
ये त्वन्ये धनलुब्धसकुलधियस्तेषा न तृष्णा हता ।
इत्थं कस्य कृते कृत स विधिना कीदृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ २९

भिक्षाहारमदैन्यमप्रतिसुख भीतिच्छिद सर्वतो
दुर्मात्सर्यमदाभिमानमथन दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभ साधुप्रिय पावन
शंभो सत्रमवार्यमक्षयनिधिं शसन्ति योगीश्वरा ॥

भोगे रोगभय कुले च्युतिभय वित्ते नृपालाद्भय
माने दैन्यभय बले रिपुभय रूपे जराया भयम् ।
शास्त्रे वादिभय गुणे खलभय काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वित भुवि नृणा वैराग्यमेवाभयम् ॥

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वल यौवन
सतोषो धनलिप्सया शमसुख प्रौढाङ्गनाविभ्रमै ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै-
रस्थैर्येण विभूतयोऽप्युपहता ग्रस्त न किं केन वा ॥

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापद ।

जातंजातमवश्यमाशु विवशं मृत्यु करोत्यात्मसा-
सात्कि तेन निरङ्कुशेन विधिना यन्निर्मित सुस्थिरम् ॥

भोगास्तुङ्गतरङ्गभङ्गतरला प्राणा क्षणध्वंसिन
स्तोकान्येव दिनानि यौवनसुखस्फूर्ति प्रियासु स्थिता ।
तत्संसारमसारमेव निखिल बुद्ध्वा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्न समाधीयताम् ॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विधद्ध्व बुधा ॥

आयु कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
रर्था सकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगा ।
कण्ठाश्लेषोपगूढ तदपि च न चिरं यत्प्रियाभि प्रणीत
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम्

कृच्छ्रेणामेध्यमध्ये नियमिततनुभि स्थीयते गर्भवासे
कान्ताविश्लेषदु खव्यतिकरविषमो यौवने चोपभोग ।

वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधु
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ ३८ ॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भव-
स्तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोत्पत्तिवशात्स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥३९॥

ब्रह्मेन्द्रादिमरुद्गणास्तृणकणा यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।
भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते
भो साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥

कालमहिमानुवर्णनम् ॥

सा रम्या नगरी महान्स नृपति सामन्तचक्रं च त-
त्पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बानना. ।
उद्वृत्त स च राजपुत्रनिवहस्ते वन्दिनस्ता कथा
सर्वं यस्य वशादगात्स्मृतिपथ कालाय तस्मै नम ॥

यत्रानेक क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं नेयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ
काल कल्यो भुवनफलके क्रीडति प्राणिशारै ॥४२॥

आदित्यस्य गतागतैरहरह सक्षीयते जीवित
व्यापारैर्बहुकार्यभारगुरुभि कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरण त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥

रात्रि: सैव पुन. स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रिया. ।

व्यापारैः पुनरुक्तभूतविषयैरित्थंविधेनामुना
संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥ ४४ ॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ४५ ॥

नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥४६॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता ।
आलोलायतलोचना: प्रियतमा स्वप्नेऽपि नालिङ्गिता
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥ ४७ ॥

वयं येभ्यो जाताश्चिरपरिचिता एव खलु ते
समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।

इदानीमेते स्म प्रतिदिवसमासन्नपतना
गतास्तुल्यावस्था सिकतिलनदीतीरतरुभिः ॥ ४८ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ ५० ॥

यतिनृपतिसंवादवर्णनम् ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ।

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पव्युपशमनविधावक्षय पाटवं न ।
सेवन्ते त्वा धनाढ्या मतिमलहृतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्ननास्था ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इव परितोषो निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ५३ ॥

फलमलमशनाय स्वादुपानाय तोयं
क्षितिरपि शयनार्थं वाससे वल्कलं च ।
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणा-
मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥

अशीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥

न नटा न विटा न गायका
न च सभ्येतरवादचुञ्चवः ।

नृपमीक्षितुमत्र के वयं
    स्तनभारानमिता न योषित ॥ ५६ ॥

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा
    विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
    कतिपयपुरस्वाम्ये पुंसां क एष मदज्वर ॥ ५७ ॥

अभुक्तायां यस्यां क्षणमपि न जातं नृपशतै-
    र्भुवस्तस्या लाभे क इव बहुमान क्षितिभृताम् ।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
    विषादे कर्तव्ये विदधति जडा. प्रत्युत मुदम् ॥ ५८ ॥

मृत्पिण्डो जलरेखया वलयित. सर्वोऽप्ययं नन्वणु
    स्वांशीकृत्य तमेव संगरशतै राज्ञां गणा भुञ्जते ।
ते दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रा भृशं
    धिग्धिक्तान्पुरुषाधमान्धनकणान्वाञ्छन्ति तेभ्योऽपि ये ॥

स जात कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
    कपालं यस्योच्चैर्विनिहितमलंकारविधये ।

नृभि प्राणत्राणप्रवणमतिभि' कैश्चिदधुना
नमद्भि. क पुंसामयमतुलदर्पज्वरभर ॥ ६० ॥

मन.सबोधननियमनम् ॥

परेषा चेतासि प्रतिदिवसमाराध्य बहुधा
प्रसाद किं नेतु विशसि हृदय क्लेशकलितम् ।
प्रसन्ने त्वय्यन्त स्वयमुदितचिन्तामणिगणो
विविक्त सकल्प किमभिलषित पुष्यति न ते ॥ ६१ ॥

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यता
स्वय भवति यद्यथा भवति तत्तथा नान्यथा ।
अतीतमननुस्मरन्नपि च भाव्यसकल्पय-
न्नतर्कितसमागमाननुभवामि भोगानहम् ॥ ६२ ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमशेषदु.खशमनव्यापारदक्ष क्षणात् ।
स्वात्मीभावमुपैहि सत्यज निजां कल्लोललोला गतिं
मा भूयो भज भङ्गुरा भवरतिं चेत: प्रसीदाधुना ॥

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ
  चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु ।
को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च
  ज्वालाग्रेषु च पन्नगेषु च सुहृद्वर्गेषु च प्रत्ययः ॥ ६४ ॥

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया
  भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ।
कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसी-
  रथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ ६५ ॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः
  पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
  नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६६ ॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
  न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
संपादिताः प्रणयिनो विभवैस्ततः किं
  कल्पस्थितास्तनुभृतां तनवस्ततः किम् ॥ ६७ ॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थ
स्नेहो न बन्धुषु न मन्मथजा विकारा' ।
ससर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमित परमर्थनीयम् ॥ ६८ ॥

तस्मादनन्तमजरं परम विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पै ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादय कृपणलोकमता भवन्ति ॥ ६९ ॥

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डल भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु विमल कथमात्मनीन
न ब्रह्म ससमरसि निर्वृतिमेषि येन ॥ ७० ॥

नित्यानित्यवस्तुविचारः ॥

किं वेदै स्मृतिभि पुराणपठनै शास्त्रैर्महाविस्तरै'
स्वर्गग्रामकुटीनिवासफलदै कर्मक्रियाविभ्रमै ।

मुक्त्वैकं भवदु खभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषैर्वणिग्वृत्तिभि. ॥ ७१ ॥

यतो मेरु· श्रीमान्निपतति युगान्ताग्निवलित
समुद्रा शुष्यन्ति प्रचुरमकरग्राहनिलया ।
धरा गच्छन्त्यन्त धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ ७२ ॥

गात्र संकुचित गतिर्विगलिता दन्ताश्च नाशं गता
दृष्टिर्नश्यति वर्धते बधिरता वक्त्र च लालायते ।
वाक्य नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्ट पुरुषस्य जीर्णवयस पुत्रोऽप्यवज्ञायते ॥ ७३ ॥

वर्णं सित झटिति वीक्ष्य शिरोरुहाणा
स्थानं जरापरिभवस्य तदा पुमासम् ।
आरोपितास्थिशतक परिहृत्य यान्ति
चण्डालकूपमिव दूरतर तरुण्य ॥ ७४ ॥

यावत्स्वस्थमिद शरीरमरुज यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुष. ।

आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्सदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ७५ ॥

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयम् ।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसा-
न्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ७६ ॥

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो
वयं च स्थूलेच्छाः सुमहति फले बद्धमनसः ।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ ७७ ॥

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ॥७८॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ।

कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥ ७९ ॥

रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥

शिवार्चनम् ॥

आसंसारात्त्रिभुवनमिदं चिन्वता तात तादृक्-
नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ।
योऽयं धत्ते विषयकरिणीगाढगूढाभिमान-
क्षीबस्यान्तःकरणकरिणः संयमानायलीलाम् ॥ ८१ ॥

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्-
न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ८२ ॥

जीर्णा एव मनोरथाश्च हृदये यात च तद्यौवन
हन्ताङ्गेषु गुणाश्च वन्ध्यफलता याता गुणज्ञैर्विना ।
किं युक्त सहसाभ्युपैति बलवान्काल कृतान्तोऽक्षमी
हा ज्ञात मदनान्तकाङ्घ्रियुगल मुक्त्वास्ति नान्या गति ॥

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ८४ ॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने ।
सुखासीना शान्तध्वनिषु रजनीषु द्युसरित ।
भवाभोगोद्विग्ना शिव शिव शिवेत्युच्चवचस
कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम् ॥८५॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदया
स्मरन्त ससारे विगुणपरिणामा विधिगतिम् ।
वय पुण्यारण्ये परिणतशरच्चन्द्रकिरणा-
स्त्रियामा नेष्यामो हरचरणचिन्तैकशरणा ॥ ८६ ॥

कदा वाराणस्याममरतटिनीरोधसि वस-
न्वसान कौपीन शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८७ ॥

स्नात्वा गाङ्गैः पयोभि शुचिकुसुमफलैरर्चयित्वा विभो त्वा
ध्येये ध्यान निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
दु खं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥

एकाकी निःस्पृह शान्त पाणिपात्रो दिगम्बर ।
कदा शंभो भविष्यामि कर्मनिर्मूलनक्षम ॥ ८९ ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्व मुहु पश्यताम् ।
अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशा-
मध्वा कोऽपि शिवप्रसादसुलभः संपत्स्यते योगिनाम् ॥

अवधूतचर्या ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्षभैक्ष्यमशनं निद्रा श्मशाने वने ।
स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा
स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ।

ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितेनाब्धिः क्षुब्धो न खलु जायते ॥ ९२ ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भू-
र्भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि ।
सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतै-
र्भिक्षावस्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ९३ ।

महाशय्या पृथ्वी विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः
सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ९४ ॥

भिक्षाशी जनमध्यसङ्गरहित स्वायत्तचेष्ट सदा
हानादानविरक्तमार्गनिरत कश्चित्तपस्वी स्थित ।
रथ्याकीर्णविशीर्णजीर्णवसन सप्राप्तकन्थासनो
निर्मानो निरहङ्कृति शमसुखाभोगैकबद्धस्पृह ॥ ९५ ।

चण्डाल किमय द्विजातिरथवा शूद्रोऽथ किं तापस
किं वा तत्त्वविवेकपेशलमतिर्योगीश्वर कोऽपि किम् ।
इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनै
र्न क्रुद्धा. पथि नैव तुष्टमनसो यान्ति स्वय योगिन. ॥

हिंसाशून्यमयत्नलभ्यमशन धात्रा मरुत्कम्पित
व्यालाना पशवस्तृणाङ्कुरभुजस्तुष्टा स्थलीशायिन ।
ससारार्णवलङ्घनक्षमधिया वृत्ति कृता सा नृणा
तामन्वेषयतां प्रयान्ति सतत सर्वे समाप्तिं गुणा ॥

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्य मम सुदिवसैर्यत्र ते निर्विशङ्का
कण्डूयन्ते जठरहरिणा स्वाङ्गमङ्गे मदीये ॥ ९८ ॥

पाणि पात्र पवित्र भ्रमणपरिगत भैक्षमक्षय्यमन्नं
विस्तीर्णं वस्त्रमाशादशकमचपल तल्पमस्वल्पमुर्वी ।
येषा नि सङ्गताङ्गीकरणपरिणतस्वान्तसतोषिणस्ते
धन्या सन्यस्तदैन्यव्यतिकरनिकरा कर्म निर्मूलयन्ति ॥

मातर्मेदिनि तात मारुत सखे तेज. सुबन्धो जल
भ्रातर्व्योम निबद्ध एव भवतामन्त्य. प्रणामाञ्जलि. ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ १०० ॥

इति वैराग्यशतक सपूर्णम् ॥